# Shivaproktam Kashivasayogyatopadesham

# शिवप्रोक्तं काशीवासयोग्यतोपदेशम्

## Document Information

Text title : Shivaproktam Kashivasayogyatopadesham

File name : shivaproktaMkAshIvAsayogyatopadesham.itx

Category : shiva, upadesha, advice, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 4 | 77-121||

Latest update : March 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2024

*sanskritdocuments.org*

# शिवप्रोक्तं काशीवासयोग्यतोपदेशम्

- शिवपार्वतीसंवादे -
श्रीपार्वत्युवाच -
महादेवैवमनिशं विघ्नोपद्रुतमादरात् ।
कथं काशीनिवासार्थमुद्योगङ्कर्तुमिच्छति ॥ ७७॥

एवमुक्तप्रकारेण भुवि कस्यापि सर्वथा ।
न भविष्यति विश्वेश काशीवासोऽतिदुर्लभः ॥ ७८॥

कीदृशः पुरुषो योग्यः काश्यां स्थातुं पुरान्तक ।
कथं स्थातव्यमनिशं वद सर्वं विशेषतः (अशेषतः) ॥ ७९॥

श्रीशिव उवाच -
शृणु गौरि वरारोहे यथाशास्त्रं वदाम्यहम् ।
काशीवासाय योग्यो हि पुरुषो विजितेन्द्रियः ॥ ८०॥

निष्कल्मषो नीतियुक्तो निरीहो निर्गतस्पृहः ।
जीर्णवल्कलवीताङ्गः पाण्डुपर्णाशनप्रियः ॥ ८१॥

दयायुक्तः शान्तियुक्तो निरीहो निर्गतस्पृहः ।
अष्टाङ्गयोगनिरतो मौनव्रतपरायणः ॥ ८२॥

विभूतिभूषणो नित्यं त्रिपुण्ड्राङ्कितमस्तकः ।
रुद्राक्षमालावीताङ्गो लिङ्गपूजापरायणः ॥ ८३॥

तुल्यनिन्दास्तुतिर्धीरस्तुल्यो मानापमानयोः ।
रागद्वेषादिरहितो विरक्तो विगतस्पृहः ॥ ८४॥

पञ्चाग्निसेवानिरतो नित्यं यात्रारतोऽनिशम् ।
नित्यान्तर्गृहयात्रायां नियतो दृढविग्रहः ॥ ८५॥

पञ्चाक्षरजपासक्तः पक्षे पक्षे यथाविधि ।

पञ्चक्रोशस्य यात्रायां नियतः सत्यमानसः ॥ ८६ ॥

सत्यव्रतः सत्यपरो नित्यं मत्पूजने रतः ।
मद्भक्तजनसंसेवी मल्लिङ्गैकार्चनप्रियः ॥ ८७॥

शैवशास्त्ररतो नित्यं शैवव्रतरतः सदा ।
काशीवासाम मुख्योऽयं मध्यमोऽप्युच्यते जनः ॥ ८८॥

असञ्चिताकृष्टपच्यनीवारकणभोजनः ।
यथोक्तयात्रानिरतः सर्वसङ्गविवर्जितः ॥ ८९॥

निर्ममो निरहङ्कारस्त्यक्तबन्धुनिराकुलः ।
सर्वदा धूपदीपाद्यैर्मल्लिङ्गार्चनतत्परः ॥ ९०॥

वीतरागो गतस्नेहः पुत्रस्नेहादिवर्जितः ।
वेदान्तश्रवणासक्तो वेदाध्ययनतत्परः ॥ ९१॥

कालभैरवपूजायां नियतः प्रतिवासरम् ।
इतोऽन्ये मनुजाः काश्यां तिष्ठन्तोऽपि नराधमाः ॥ ९२॥

काशीवाससमुत्पन्नधर्मभागेन सर्वथा ।
प्रत्युतास्यां स्थिताः काश्यां पापमेवार्जयन्ति ते ॥ ९३॥

तदन्यैर्मनुजैः काश्यां न स्थातव्यं कदाचन ।
तदन्यैरात्महत्यैव क्रियते स्थीयते यदि ॥ ९४॥

मदुक्तकर्महीनैस्तु काश्यां न स्थेयमेव हि ।
काश्यां प्रतिग्रहो नैव कर्तव्यः सर्वथा जनैः ॥ ९५॥

यदि मोहात्प्रमादाद्वा करोति स पतत्यधः ।
नीरं वा पाण्डुपत्राणि भक्षयित्वा यथाचितम् ॥ ९६॥

स्थातव्यमनिशं काश्यां मुक्तिकामेन शैलजे ।
तत्तद्दिनार्जितैः धान्यैः नीवारैर्वा स्वकं वपुः ॥ ९७॥

पोषणीयं नित्ययात्राशिवध्यानपरायणैः ।
दिनान्तराशनार्थाय सङ्ग्रहः सर्वथा जनैः ॥ ९८॥

न कर्तव्यो न कर्तव्यः काश्यां प्रयतमानसैः ।
काश्यां प्रतिग्रहासक्तैर्धनसङ्ग्रहतत्परैः ॥ ९९॥

स्थित्वान्ते यातना घोरा भोक्तव्या नात्र संशयः ॥ १००॥

दुष्प्रतिग्रहसंसक्तैर्दुरन्नाशनलोलुपैः ।
अन्यायार्जितवित्तैश्च काश्यां न स्थेयमम्बिके ॥ १०१॥

असत्यवादिभिर्दुष्टैर्विषयासक्तमानसैः ।
शिवाचारविहीनैश्च काश्यां न स्थेयमम्बिके ॥ १०२॥

भस्मोद्धूलनरुद्राक्षजटाहीनैर्नराधमैः ।
लिङ्गपूजाविहीनैश्च काश्यां न स्थेयमम्बिके ॥ १०३॥

मदन्यपूजनासक्तैर्मदन्यालोकनोत्सुकैः ।
मदन्याश्रयचित्तैश्च काश्यां न स्थेयमम्बिके ॥ १०४॥

पुत्रस्नेहरतैर्लुब्धैर्धीवरैः पिशुनैर्जडैः ।
स्वदेहपोषणासक्तैः काश्यां न स्थेयमम्बिके ॥ १०५॥

शिवद्वेषरतैर्मूढैः कृपणैः शिवनिन्दकैः ।
पञ्चाक्षरविहीनैश्च काश्यां न स्थेयमम्बिके ॥ १०६॥

रागद्वेषाक्रान्तचित्तैर्मदनाक्रान्तविग्रहैः ।
राजसैस्तामसैः शून्यैः काश्यां न स्थेयमम्बिके ॥ १०७॥

ईदृशैः पापनिरतैः स्थित्वा काश्यां यथेच्छया ।
देहान्ते यातनाः क्रूराः प्राप्तव्याः सत्यमुच्यते ॥ १०८॥

परस्त्रीनिरतैः नष्टैः शिवशास्त्रविनिन्दकैः ।
शैवदुःखकरै क्रूरैः काश्यां न स्थेयमम्बिके ॥ १०९॥

पापभीरुभिरुत्कृष्टैः शैवशास्त्रविशारदैः ।
लिङ्गपूजापरैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११०॥

भस्मत्रिपुण्ड्रनिटिलैः भस्मोद्धूलिततत्परैः ।
रुद्राध्यायजपासक्तैः शिववीक्षणतत्परैः ।
निष्कल्मषपरैः शैवैः काश्यां स्थातव्यमम्बिके ॥ १११॥

रुद्राक्षमालाभरणैः जटामण्डलमण्डितैः ।
शिवध्यानरतैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११२॥

महापाशुपतैर्धीरैर्योगशास्त्रविशारदैः ।
शिवाद्वैतपरैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११३॥

जितेन्द्रियैर्जिताहारैर्जीर्णपर्णाम्बुभक्षणैः ।
शिवैकशरणै शैवैः काश्यां स्थातव्यमम्बिके ॥ ११४॥

रागद्वेषादिरहितैश्छिन्नसंसारबन्धनैः ।
सात्विकरनघैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११५॥

कलत्रपुत्रमित्रेष्टस्नेहहीनैरनाकुलैः ।
शिवभक्तरतैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११६॥

यदृच्छालाभसन्तुष्टैः सुखदुःखविवर्जितैः ।
नित्यं यात्रापरैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११७॥

नित्यं मत्पूजनासक्तैः मद्भक्तजनसेवकैः ।
हृष्टान्तःकरणैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११८॥

अन्तर्गृहादियात्रायां नित्यमुद्युक्तमानसैः ।
मत्तत्त्वचिन्तकैः शैवैः काश्यां स्थातव्यमम्बिके ॥ ११९॥

अत्युत्सुकैरनिर्विण्णैः प्रतिग्रहपराङ्मुखैः ।
वशीकृतेन्द्रियैः शैवैः काश्यां स्थातव्यमम्बिके ॥ १२०॥

- -

हर हर परमेशानन्दकन्देश शम्भो
शिव शिव करुणाब्धे शङ्कराशेषहेतो ।
भव भवभयहारिन् देव देवेति नित्यं
शिवनगरनिवासाक्तचित्ता वदन्ति ॥ १२१॥

॥ इति शिवरहस्यान्तर्गते शिवप्रोक्तं काशीवासयोग्यतोपदेशं सम्पूर्णम् ॥

- ॥ श्रीशिवरहस्यम् । उग्राख्यः सप्तमांशः । अध्यायः ४ । ७७-१२१॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 4 . 77-121..

Notes:
Śiva शिव describes to Pārvatī पार्वती, the regulations, including that of the Pañcakrośātmaka Yātrā पञ्चक्रोशात्मक यात्रा, that need to be observed by those who wish to reside in Kaśī काशी.

Kaśī काशी harbors several ŚivaTīrthaKṣetra शिवतीर्थक्षेत्र that are outlined in ŚivaRahasyam saptāṃśaḥ शिवरहस्यं सप्तांशः.

Proofread by Ruma Dewan

*Shivaproktam Kashivasayogyatopadesham*

pdf was typeset on March 8, 2024

Please send corrections to *sanskrit@cheerful.com*